# ॥ सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम् ॥

## ॥ ध्यानम् ॥

शक्तिहस्तं विरूपाक्षं शिखिवाहं षडाननम् ।
दारुणं रिपुरोगघ्नं भावये कुक्कुटध्वजम् ॥

## ॥ स्तोत्रम् ॥

स्कन्दो गुहः षण्मुखश्च फालनेत्रसुतः प्रभुः ।
पिङ्गलः कृत्तिकासूनुः शिखिवाहो द्विषड्भुजः ॥ १ ॥

द्विषण्णेत्रः शक्तिधरः पिशिताशप्रभञ्जनः ।
तारकासुरसंहारी रक्षोबलविमर्दनः ॥ २ ॥

मत्तः प्रमत्तोन्मत्तश्च सुरसैन्यसुरक्षकः ।
देवसेनापतिः प्राज्ञः कृपालुर्भक्तवत्सलः ॥ ३ ॥

उमासुतः शक्तिधरः कुमारः क्रौञ्चदारणः ।
सेनानीरग्निजन्मा च विशाखः शङ्करात्मजः ॥ ४ ॥

शिवस्वामी गणस्वामी सर्वस्वामी सनातनः ।
अनन्तमूर्तिरक्षोभ्यः पार्वतीप्रियनन्दनः ॥ ५ ॥

गङ्गासुतः शरोद्भूत आहूतः पावकात्मजः ।
जृम्भः प्रजृम्भ उज्जृम्भः कमलासनसंस्तुतः ॥ ६ ॥

एकवर्णो द्विवर्णश्च त्रिवर्णः सुमनोहरः ।
चतुर्वर्णः पञ्चवर्णः प्रजापतिरहःपतिः ॥ ७ ॥

अग्निगर्भः शमीगर्भो विश्वरेता सुरारिहा ।
हरिद्वर्णः शुभकरो वटुश्च पटुवेषभृत् ॥ ८ ॥

पूषा गभस्तिर्गहनश्चन्द्रवर्णः कलाधरः।
मायाधरो महामायी कैवल्यः शङ्करात्मजः॥९॥

विश्वयोनिरमेयात्मा तेजोयोनिरनामयः।
परमेष्ठी परब्रह्म वेदगर्भो विराड्वपुः॥१०॥

पुलिन्दकन्याभर्ता च महासारस्वतावृतः।
आश्रिताखिलदाता च चोरघ्नो रोगनाशनः॥११॥

अनन्तमूर्तिरानन्दः शिखण्डी-कृतकेतनः।
डम्भः परमडम्भश्च महाडम्भो वृषाकपिः॥१२॥

कारणोत्पत्ति-देहश्च कारणातीत-विग्रहः।
अनीश्वरोऽमृतः प्राणः प्राणायामपरायणः॥१३॥

विरुद्धहन्तो वीरघ्नो रक्तश्यामगलोऽपि च।
सुब्रह्मण्यो गुहः प्रीतो ब्रह्मण्यो ब्राह्मणप्रियः।
वंशवृद्धिकरो वेदवेद्योऽक्षयफलप्रदः॥१४॥

॥इति श्री-सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Subrahmanya_Ashtottara_Shatanama_Stotram.
generated on **August 16, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits